# इयम् आकाशवाणी

# सम्प्रति वार्ताः श्रूयन्ताम्

**दिनाङ्क :-05.02.2025**

**प्रातः - 06:55**

अथ वार्ताः

दिल्ली – निर्वाचनम्

सप्ततिसदस्यात्मिकीयायै दिल्लीविधानसभायै अद्य मतदानं किञ्चिद्कालानन्तरं अर्थात् प्रातःकाले: सप्तवादनात् समारप्स्यते अपि च सायं षड्वादनं यावत् मतदान-प्रक्रिया प्रचलिष्यति। षड्-पञ्चाशल्लक्षाधिकैककोटिसङ्ख्यकाः मतदातारः मतदानं करिष्यन्ति। निर्वाचनरणे प्रमुखप्रत्याशिनः आम-आदमी-पार्टीति-दलस्य राष्ट्रिय-संयोजकः अरविन्दकेजरीवालः दिल्ल्याः मुख्यमन्त्री आतिशी दिल्ल्याः मन्त्री गोपालरायः भाजपेतिदलीयाः विजेन्द्रगुप्ता प्रवेशवर्मा रमेशबिधूडी कैलाशगहलोतः च वर्तन्ते। कांग्रेसदलस्य संदीपदीक्षितः हारूनयुसूफः अल्कालाम्बाः च विद्यन्ते। राष्ट्रिय-राजधान्यां स्वतन्त्रं निष्पक्षं शान्तिपूर्णं च मतदानं सुनिश्चितुं व्यापकप्रबन्धनं विहितमस्ति। सप्ततिविधानसभाक्षेत्रेषु भूयोऽपि सप्तशतोत्तर-त्रयोदशसहस्रं यावत् मतदानकेन्द्राणि स्थापितानि।

प्रधानमन्त्री – महाकुम्भः

प्रधानमन्त्री नरेन्द्रमोदी अद्य उत्तरप्रदेशे प्रयागराजे महाकुम्भं प्रति यास्यति। स्व-यात्रावधौ श्रीमोदी सङ्गमे पुण्यावगाहनं समाचरिष्यति। अत्रावसरे उत्तरप्रदेशस्य मुख्यमन्त्री योगि-आदित्य-नाथ: उपस्थितो भविष्यति। स्वयात्राप्रवासे प्रधानमन्त्री गङ्गा-यमुना-सरस्वती-नदीनां सङ्गतटे त्रिवेणि-सङ्गमे पूजार्चनां विधास्यति। गतमासे नवदशदिनाङ्के स्वीये 'मन की बात' इत्येतस्मिन् कार्यक्रमे प्रधानमन्त्री मोदी उक्तवान् यत् कुम्भ: विविधातायाम् एकताया: उत्सवो विद्यते। विश्वस्य बृहत्तम: एष: समागम: देशविदेशयो: जनानां ध्यानम् आकर्षयति। एतत् महाकुम्भ-मेलकं जनवरीमासे त्रयोदशदिनाङ्के समारब्धम् तावत् साम्प्रतं यावत् अष्टत्रिंशत्कोटिजनै: पुण्यावगाहनं पवित्रस्नानं समाचरितम्। भारतस्य आध्यात्मिकं सांस्कृतिकं च न्यासं वर्धयितुं संरक्षितुं च प्रशासनस्य प्रतिबद्धताया: अनुसारं प्रधानमन्त्री मोदी तीर्थस्थलेषु आधारभूत-संरचनानां सौविध्यानां च वर्धनाय अनेकान् पदक्षेपान् उत्थापितवान्।

प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् तस्य प्रशासनं निर्धनजनानां कल्याणार्थं अनेकान् उपायान् अकरोत् यस्य परिणामेन पञ्च विंशति कोटिजनाः निर्धनतात: मुक्ताः अभवन् इति। राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावस्य विषये लोकसभायां ह्य: चर्चाया: प्रत्युत्तरे प्रधानमन्त्रिणा निगदितं यत् केवलम् एतत् अस्य प्रशासनस्य प्रतिबद्धतायाः, समर्पणस्य, परिश्रमस्य च कारणात् एव शक्यम् जातम्। श्रीमोदीना आश्वासितं यत् तस्य प्रशासनं योजनानां शतप्रतिशत-संतृप्तिम् उद्दिश्य महत्त्वं दत्त्वा च विकसित-भारतस्य सङ्कल्पं साधयितुं कार्यं कुर्वद् अस्ति इति। सः राष्ट्रपतेः अभिभाषणम् प्रेरणात्मकम् इति अवोचत् यत् विकसित-भारतस्य संकल्पं सुदृढं करोति, नूतनां आशां जनान् प्रेरयति च इति। श्रीमोदी अपि अवदत् यत् भारते आर्टिफिशियल् इन्टेलिजेन्स् इत्यस्य विकासाय उपक्रमाणां कृते तस्य प्रशासनेन प्राधान्यम् अददात्। श्रीमोदी अवदत् यत्, प्रशासनं संविधानस्य भावं जानाति, तस्य कृते समर्पितम् च अस्ति। पश्चात् सभायां राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावः ध्वनिमतद्वारा स्वीकृतः।

शिवराजसिंहचौहान:

केन्द्रीयग्रामीणविकासमन्त्री शिवराजसिंह चौहान: अद्य जल-लाए-धन-धान्य इत्येतस्मिन् विषये प्रत्यक्षपरोक्षमाध्यमेन आन्तर्जालिक-प्रणाल्या जलक्षेत्र यात्राया: आरम्भं करिष्यति। ह्य: नवदिल्ल्यां श्रीचौहान: उक्तवान् यत् जलक्षेत्रविकासकार्याणां विषयम् उद्दिश्य षड्विंशतिराज्येषु द्वयो: केन्द्रशासित प्रदेशयो: त्रिसप्तत्यधिक षड्शतोत्तर-षड्सहस्रं यावत् ग्रामपञ्चायतानि समाविष्टानि सन्तीति।

इति वार्ता।।